॥ वाल्मीकि रामायण॥

५ सुन्दरकाण्ड

अध्याय ६२

सुग्रीवेणैवमुक्तस्तु हृष्टो दधिमुखः कपिः ।
राघवं लक्ष्मणं चैव सुग्रीवं चाभ्यवादयत् ॥ १॥

स प्रणम्य च सुग्रीवं राघवौ च महाबलौ ।
वानरैः सहितैः शूरैर्दिवमेवोत्पपात ह ॥ २॥

स यथैवागतः पूर्वं तथैव त्वरितो गतः ।
निपत्य गगनाङ्गमौ तद्वनं प्रविवेश ह ॥ ३॥

स प्रविष्टो मधुवनं ददर्श हरियूथपान् ।
विमदानुद्धतान्सर्वान्मेहमानान्मधूदकम् ॥ ४॥

स तानुपागमद्वीरो बद्धवा करपुटाञ्जलिम् ।
उवाच वचनं श्लक्ष्णमिदं हृष्टवदङ्गदम् ॥ ५॥

सौम्य रोषो न कर्तव्यो यदेभिरभिवारितः ।
अज्ञानाद्रक्षिभिः क्रोधाङ्गवन्तः प्रतिषेधिताः ॥ ६॥

युवराजस्त्वमीशश्च वनस्यास्य महाबल ।
मौर्ख्यात्पूर्वं कृतो दोषस्तङ्गवान्क्षन्तुमर्हति ॥ ७॥

यथैव हि पिता तेऽभूत्पूर्वं हरिगणेश्वरः ।
तथा त्वमपि सुग्रीवो नान्यस्तु हरिसत्तम ॥ ८॥

आख्यातं हि मया गत्वा पितृव्यस्य तवानघ ।
इहोपयानं सर्वेषामेतेषां वनचारिणाम् ॥ ९॥

स त्वदागमनं श्रुत्वा सहैभिर्हरियूथपैः ।
प्रहृष्टो न तु रुष्टोऽसौ वनं श्रुत्वा प्रधर्षितम् ॥ १०॥

प्रहृष्टो मां पितृव्यस्ते सुग्रीवो वानरेश्वरः ।
शीघ्रं प्रेषय सर्वांस्तानिति होवाच पार्थिवः ॥ ११॥

श्रुत्वा दधिमुखस्यैतद्वचनं श्लक्ष्णमङ्गदः ।
अब्रवीत्तान्हरिश्रेष्ठो वाक्यं वाक्यविशारदः ॥ १२॥

शङ्के श्रुतोऽयं वृत्तान्तो रामेण हरियूथपाः ।
तत्क्षमं नेह नः स्थातुं कृते कार्ये परन्तपाः ॥ १३॥

पीत्वा मधु यथाकामं विश्रान्ता वनचारिणः ।
किं शेषं गमनं तत्र सुग्रीवो यत्र मे गुरुः ॥ १४॥

सर्वे यथा मां वक्ष्यन्ति समेत्य हरियूथपाः ।
तथास्मि कर्ता कर्तव्ये भवद्भिः परवानहम् ॥ १५॥

नाज्ञापयितुमीशोऽहं युवराजोऽस्मि यद्यपि ।
अयुक्तं कृतकर्माणो यूयं धर्षयितुं मया ॥ १६॥

ब्रुवतश्चाङ्गदस्यैवं श्रुत्वा वचनमव्ययम् ।
प्रहृष्टमनसो वाक्यमिदमूचुर्वनौकसः ॥ १७॥

एवं वक्ष्यति को राजन्प्रभुः सन्वानरर्षभ ।
ऐश्वर्यमदमत्तो हि सर्वोऽहमिति मन्यते ॥ १८॥

तव चेदं सुसदृशं वाक्यं नान्यस्य कस्य चित् ।
संनतिर्हि तवाख्याति भविष्यच्छुभभाग्यताम् ॥ १९॥

सर्वे वयमपि प्राप्तास्तत्र गन्तुं कृतक्षणाः ।
स यत्र हरिवीराणां सुग्रीवः पतिरव्ययः ॥ २०॥

त्वया ह्यनुक्तैर्हरिभिर्नैव शक्यं पदात्पदम् ।
क्व चिद्गन्तुं हरिश्रेष्ठ ब्रूमः सत्यमिदं तु ते ॥ २१॥

एवं तु वदतां तेषामङ्गदः प्रत्यभाषत ।
बाढं गच्छाम इत्युक्त्वा उत्पपात महीतलात् ॥ २२॥

उत्पतन्तमनूत्पेतुः सर्वे ते हरियूथपाः ।
कृत्वाकाशं निराकाशं यज्ञोत्क्षिप्ता इवानलाः ॥ २३॥

तेऽम्बरं सहसोत्पत्य वेगवन्तः प्लवङ्गमाः ।
विनदन्तो महानादं घना वातेरिता यथा ॥ २४॥

अङ्गदे ह्यननुप्राप्ते सुग्रीवो वानराधिपः ।
उवाच शोकोपहतं रामं कमललोचनम् ॥ २५॥

समाश्वसिहि भद्रं ते दृष्टा देवी न संशयः ।

नागन्तुमिह शक्यं तैरतीते समये हि नः ॥ २६ ॥

न मत्सकाशमागच्छेत्कृत्ये हि विनिपातिते ।
युवराजो महाबाहुः प्लवतां प्रवरोऽङ्गदः ॥ २७ ॥

यद्यप्यकृतकृत्यानामीदृशः स्यादुपक्रमः ।
भवेत्तु दीनवदनो भ्रान्तविप्लुतमानसः ॥ २८ ॥

पितृपैतामहं चैतत्पूर्वकैरभिरक्षितम् ।
न मे मधुवनं हन्यादहृष्टः प्लवगेश्वरः ॥ २९ ॥

कौसल्या सुप्रजा राम समाश्वसिहि सुव्रत ।
दृष्टा देवी न सन्देहो न चान्येन हनूमता ।
न ह्यन्यः कर्मणो हेतुः साधने तद्विधो भवेत् ॥ ३० ॥

हनूमति हि सिद्धिश्च मतिश् च मतिसत्तम ।
व्यवसायश्च वीर्यं च सूर्ये तेज इव ध्रुवम् ॥ ३१ ॥

जाम्बवान्यत्र नेता स्यादङ्गदश्च बलेश्वरः ।
हनूमांश्चाप्यधिष्ठाता न तस्य गतिरन्यथा ॥ ३२ ॥

मा भूच्चिन्ता समायुक्तः सम्प्रत्यमितविक्रम ॥ ३३ ॥

ततः किल किला शब्दं शुश्रावासन्नमम्बरे ।
हनूमत्कर्मदृप्तानां नर्दतां काननौकसाम् ।
किष्किन्धामुपयातानां सिद्धिं कथयताम् इव ॥ ३४ ॥

ततः श्रुत्वा निनादं तं कपीनां कपिसत्तमः ।
आयताञ्चितलाङ्गूलः सोऽभवद्धृष्टमानसः ॥ ३५ ॥

आजग्मुस्तेऽपि हरयो रामदर्शनकाङ्क्षिणः ।
अङ्गदं पुरतः कृत्वा हनूमन्तं च वानरम् ॥ ३६ ॥

तेऽङ्गदप्रमुखा वीराः प्रहृष्टाश्च मुदान्विताः ।
निपेतुर्हरिराजस्य समीपे राघवस्य च ॥ ३७ ॥

हनूमांश्च महाबहुः प्रणम्य शिरसा ततः ।
नियतामक्षतां देवीं राघवाय न्यवेदयत् ॥ ३८ ॥

निश्चितार्थं ततस्तस्मिन्सुग्रीवं पवनात्मजे ।
लक्ष्मणः प्रीतिमान्प्रीतं बहुमानादवैक्षत ॥ ३९ ॥

प्रीत्या च रममाणोऽथ राघवः परवीरहा ।
बहु मानेन महता हनूमन्तमवैक्षत ॥ ४० ॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com